# ‘मनोगतम्’[०२.४०] ‘मनकीबात’ (९३-कड़ी) प्रसारणतिथिः -२५-०९-२०२२

[भाषान्तरं - सर्वश्री-श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः। विगतेषु दिनेषु यः विषयः अस्माकं ध्यानम् आकर्षयत् - सः अस्ति चित्रकः । चित्रकविषये संवादाय बहवः सन्देशाः आगताः । भवतु नाम उत्तरप्रदेशस्य अरुण-कुमार-गुप्त-महोदयस्य सन्देशः, अथ वा तेलङ्गानाप्रान्तस्य एन्. रामचन्द्रन्-रघुराम-महोदयस्य, गुजरातस्य राजन्-महोदयस्य भवतु, उत दिल्ल्याः सुब्रत-महोदयस्य । देशस्य प्रतिकोणं जनाः भारते चित्रकागमने प्रसन्नतां प्रकटितवन्तः । त्रिंशदधिकैकशत- कोटिमिताः भारतवासिनः प्रसन्नाः सन्ति, गर्वपूरिताः वर्तन्ते, एतदस्ति भारतस्य प्रकृतिप्रेम । एतस्मिन् विषये जनानां कश्चन समानप्रश्नः एषः अस्ति यत् मोदिवर्य! चित्रव्याघ्रान् द्रष्टुम् अवसरं कदा प्राप्स्यामः?

सखायः! किञ्चन कार्यदलम् निर्मितमस्ति । एतत् कार्यदलं चित्रव्याघ्राणां निरीक्षणं करिष्यति, अथ च, एतद् द्रक्ष्यति यत् अत्रत्ये परिवेशे ते कियन्मात्रं समाविष्टाः सन्ति? एतेन आधारेण एव कतिपय-मासानाम् अनन्तरं कश्चन निर्णयः स्वीकरिष्यते, तदनन्तरं च भवन्तः चित्रव्याघ्रान् द्रष्टुं शक्ष्यन्ति । परं तावता अहं भवतः सर्वान् कानिचन कार्याणि यच्छन् अस्मि । एतदर्थं MyGov इत्यस्य पटले एका स्पर्धा आयोजयिष्यते, यस्यां सहयोगार्थम् जनान् प्रति आग्रहं करोमि । चित्रव्याघ्रान् अवलम्ब्य वयं यत् अभियानं चालयन्तः स्मः, अन्ततः तस्य अभियानस्य नाम किं भवेत्? अपि वयम् एतेषां सर्वेषां चित्रव्याघ्राणां नामकरणविषये विचारयितुं शक्नुमः यत् एतेषु प्रत्येकम् अपि केन नाम्ना आह्वयेम? वस्तुतः एतन्नामकरणं यदि पारम्परिकं

स्यात् तर्हि उत्तमम्, यतः, स्वसमाजेन संस्कृत्या परम्परया रिक्थेन च सम्बद्धं यत्किञ्चित् भवेत्, तत् अस्मान् सहजतया स्वं प्रति आकर्षयति । नैतावद् एव, भवन्तः एतद् अपि सूचयन्तु यत् कथं मनुष्यैः पशुभिः सह व्यवहरणीयम् । अस्माकं मौलिककर्तव्येषु अपि 'Respect For Animals' इत्येतदर्थम् आग्रहः कृतः अस्ति । अहं भवतः सर्वान् प्रार्थयामि यत् भवन्तः अवश्यम् एतस्यां स्पर्धायां सहभागं कुर्वन्तु । कः जानाति, कदाचित् पारितोषिकरूपेण व्याघ्र-दर्शनस्य प्रथमम् अवसरं भवान् एव प्राप्नुयात्?

मम प्रियाः देशवासिनः, अद्य सेप्टेम्बरमासस्य पञ्चविंशतिदिनाङ्के देशस्य प्रखर-मानवतावादि-चिन्तकस्य महतः सुपुत्रस्य दीनदयाल-उपाध्याय-वर्यस्य जन्मदिनम् आमान्यते । कस्यचिदपि देशस्य युवानः यथाक्रमं स्वकीये अभिज्ञाने गौरवे च गर्वम् आवहन्ति, ते, स्वीयान् मौलिकविचारान् दर्शननानि च तावन्ति एव आकर्षकाणि अनुभवन्ति । दीनदयालवर्यस्य विचाराणां सर्वथा उत्कृष्टता एषा आसीत् यत् तेन स्वकीये जीवने विश्वस्य विपरिवर्तमानाः बृहत्यः सर्वाः परिस्थितयः दृष्टाः आसन् । सः विचारधारा- विषयकाणां संघर्षाणां साक्षी आसीत् । अत एव, सः 'एकात्म-मानवदर्शनस्य' 'अन्त्योदयस्य' च कंचन विचारं देशस्य पुरतः उपस्थापितवान् यः पूर्णतया भारतीयः आसीत् ।

दीनदयाल-वर्यस्य 'एकात्ममानवदर्शन' एतादृशः विचारः अस्ति, यः विचारधारानाम्ना उत्पन्नेभ्यः द्वन्द्वेभ्यः दुराग्रहेभ्यः च मुक्तिं ददाति । तेन मानव-समभावं पुरस्कृतवत् भारतीयदर्शनं पुनः विश्वस्य समक्षम् उपस्थापितम् । अस्माकं शास्त्रेषु उक्तम् अस्ति - 'आत्मवत् सर्वभूतेषु' , अर्थात्, वयं प्रतिजीवं समानं मन्येमहि, आत्मनः सदृशं व्यवहराम । आधुनिके, सामाजिके राजनीतिके परिप्रेक्ष्ये चापि भारतीयदर्शनं कथं विश्वस्य मार्गदर्शनं कर्तुं प्रभवति इत्येतद् अस्मान् अशिक्षद् दीनदयालवर्यः । एकप्रकारेण, स्वतन्त्रतायाः अनन्तरं

देशे या हीनभावना आसीत्, ततः स्वातन्त्र्यं प्रदाप्य सः अस्माकीनां स्वीयां बौद्धिकचेतनाम् अजागर्यत । सः वदति स्म - 'अस्माकं स्वतन्त्रता तदा एव सार्था भवितुम् अर्हति यदा सा अस्माकं संस्कृतेः अभिज्ञानस्य च अभिव्यक्तिं कुर्यात्' । एतद्-विचाराधारेण सः देशविकासाय दृष्टिपथं निर्मितवान् । दीनदयाल-उपाध्याय-वर्यः कथयति स्म यत् देशस्य प्रगतेः मानाङ्कः, अन्तिमे स्थितः जनः भवति । स्वतन्त्रतायाः अमृतकाले वयं दीनदयाल-वर्यं यावत् ज्ञास्यामः, तेन यावत् शिक्षिष्यामः, तावत् एव देशम् अग्रे नेतुं प्रेरणां प्राप्स्यामः ।

मम प्रियाः देशवासिनः, अद्य आरभ्य त्रिदिनानन्तरं, अर्थात् सेप्टेम्बरमासस्य अष्टाविंश- तिदिनाङ्के अमृतमहोत्सवस्य किञ्चन विशिष्टं दिनम् आगम्यमानम् अस्ति । एतस्मिन् दिने वयं भारतमातुः वीर-सुपुत्रस्य भगतसिंहस्य जयन्तीम् आचरिष्यामः । भगतसिंह-वर्यस्य जयन्त्याः पूर्वमेव तस्मै श्रद्धाञ्जलि-स्वरुपः कश्चन महत्वपूर्णनिर्णयः कृतः । एतद् हि निर्धारितं यत् चण्डीगढस्थस्य विमानपत्तनस्य नाम अधुना हुतिङ्गतस्य भगतसिंह-वर्यस्य नाम्ना स्थापयिष्यते । चिरप्रतीक्षितं हि एतद् आसीत् । अहं पञ्जाबं चण्डीगढं हरियाणां च समेत्य देशस्य सर्वजनेभ्यः एतस्य निर्णयस्य अनन्ताः शुभकामनाः प्रकटयामि ।

सखायः, स्वीयेभ्यः स्वातन्त्र्य-वीरेभ्यः प्रेरणां स्वीकुर्याम, तेषां आदर्शमार्गम् अनुसरन्तः तदीय-स्वप्नानां भारतं रचयेम, एषः हि, तान् प्रति अस्माकं श्रद्धांजलिः भवति । हुतात्मनां स्मारकाणि, तदीय-नाम्ना स्थानानि, अथ च संस्थानानां नामानि अस्मान् कर्तव्याय प्रेरयन्ति । कतिपय-दिनानि पूर्वम् एव देशः कर्तव्यपथे नेतृवर्यस्य सुभाषचन्द्र-बोसस्य मूर्तिस्थापनेन अपि एतादृशम् एकं प्रयासं कृतवान्, अधुना हुतात्मभगत-सिंहस्य नाम्ना चंडीगढ़-

विमानपत्तनस्य नाम एतस्यां दिशि इतोऽपि एकः पदक्षेपः अस्ति । अहम् इच्छामि, अमृतमहोत्सवे यथा वयं स्वातन्त्र्यवीरैः सम्बद्धान् अवसरान् आचरन्तः स्मः, तथैव सेप्टेम्बरमासस्य अष्टाविंशति-दिनाङ्के अपि प्रत्येकं युवा कञ्चन नूतनं प्रयासम् अवश्यं कुर्यात् ।

मम प्रियाः देशवासिनः, भवतां सर्वेषां पार्श्वे सेप्टेम्बरमासस्य अष्टाविंशतिदिनाङ्कम् आमानयितुम् एकम् इतोऽपि किञ्चन कारणम् अस्ति । अपि जानन्ति, किं तत्! अहं तु केवलं शब्दद्वयं कथयिष्यामि परम् अहं जानामि, भवतां उत्साहः चतुर्गुणितः वर्धिष्यते । एतौ च शब्दौ स्तः - Surgical Strike इति । वृद्धः ननु उत्साहः? अस्माकं देशे अमृतमहोत्सवस्य यद् अभियानं चलदस्ति तत् पूर्णमनोयोगेन वयम् आचरेम, स्वप्रसन्नताः सर्वैः सह प्रकटयाम ।

मम प्रियाः देशवासिनः, कथ्यते यत् - जीवनसङ्घर्षे तप्त-व्यक्तेः समक्षं कापि बाधा न अवतिष्ठते । दैनिकजीवनचर्यायां वयम् एतादृशान् अपि कतिपय-सहयोगिनः अपि पश्यामः,ये कामपि शारीरिक-समस्यां सम्मुखीकुर्वन्तः सन्ति । बहवः एतादृशाः अपि जनाः सन्ति ये खलु श्रोतुम् असमर्थाः उक्त्वा वा स्ववार्तां उपस्थापयितुम् अशक्ताः । एतादृशेभ्यः सखाभ्यः सर्वथा बलं भवति, Sign Language इत्युक्ते साङ्केतिकभाषा । परं भारते आ बहोः कालात् समस्या आसीत् यतः साङ्केतिकभाषायै केचन स्पष्टाः भावाः निर्धारिताः नासन्, मानकता नासीत् । एताः समस्याः दूरीकर्तुम् एव पञ्चदशाधिक- द्विसहस्र-तमे वर्षे भारतीयसाङ्केतिकभाषानुसन्धान-प्रशिक्षणकेन्द्रस्य स्थापना जाता आसीत् । मम प्रसन्नता अस्ति यत् संस्थानम् एतत् अधुनावधि दशसहस्र-शब्दानाम् अथ भावानां मुद्राणां वा शब्दकोषं सज्जीकृतवद् अस्ति । दिनद्वयपूर्वम् अर्थात् सेप्टेम्बरमासीये त्रयोविंशे दिने

साङ्केतिक भाषादिवसावसरे, अनेकेषु विद्यालयीय-पाठ्यक्रमेषु अपि साङ्केतिकभाषामाध्यमम् आरब्धम् । साङ्केतिकभाषायाः निश्चित-मानकताम् अनुवर्तयितुं राष्ट्रिय-शिक्षानीतौ अपि अत्यन्तं बलं विहितम् । साङ्केतिकभाषायाः यः शब्दकोषः निर्मितः अस्ति, तस्य चलचित्र-निर्मिति-पुरस्सरम् अपि तस्य प्रसारः क्रियमाणः अस्ति । YouTube -इति सञ्चारमाध्यमे अपि अनेके जनाः, अनेकानि संस्थानानि, भारतीय-साङ्केतिक-भाषायाः स्वकीयाः वाहिन्यः आरब्धवन्तः, अर्थात्, सप्ताष्ट-वर्षाणां पूर्वं साङ्केतिकभाषाविषयकं यद् अभियानं देशे प्रारब्धम् आसीत्, अधुना तस्य लाभः लक्षसङ्खा- केभ्यः मम दिव्याङ्ग-भ्रातृ-भगिनीभ्यः जायमानः अस्ति । हरियाणानिवासिनी पूजा-महोदया तु भारतीयसाङ्केतिकभाषया अत्यन्तं प्रसन्ना अस्ति । पूर्वं सा स्वपुत्रेण सह संवादम् एव न कर्तुं शक्नोति स्म, परम्, अष्टादशाधिकद्विसहस्रतमे वर्षे साङ्केतिकभाषायाः प्रशिक्षणं प्राप्य, मातृ-पुत्रयोः द्वयोः अपि जीवनं सरलं जातम् । पूजा-महोदयायाः पुत्रः अपि साङ्केतिकभाषां पठितवान्, अथ च अनन्तरं स्वकीये विद्यालये कथाकथन-स्पर्धायां पारितोषिकम् अपि विजितवान् । एवं प्रकारेण एव, टिंकाजि-इत्यस्याः षड्वर्षीया पुत्री अस्ति, या श्रोतुं न शक्नोति । टिंकाजी-महोदया स्वपुत्रीं साङ्केतिक-भाषापाठ्यक्रमं पाठितवती परं सा स्वयं तां साङ्केतिकभाषां न जानाति स्म, एतेन कारणेन सा स्वपुत्र्या सह संवादं न कर्तुं शक्नोति स्म । अधुना टिंकाजि-वर्या अपि साङ्केतिकभाषायाः प्रशिक्षणं स्वीकृतवती | अधुना च उभे अपि मातृ-पुत्र्यौ परस्परं सम्यक्संवादं कुरुतः । एतेषां प्रयासानाम् अत्यधिकं लाभः केरलस्य मंजू-वर्यायै अपि अभवत् । मञ्जू-वर्या, जन्मतः एव श्रोतुम् अशक्ता अस्ति, न एतावद् एव तदीय-पित्रोः जीवने अपि एषा एव स्थितिः आसीत् । एतस्याम् अवस्थायां साङ्केतिकभाषा पूर्ण-परिवाराय

संवादमाध्यमरूपा संवृत्ता । अधुना तु मञ्जू-वर्या स्वयम् अपि साङ्केतिकभाषायाः शिक्षिका भवितुं निर्णीतवती ।

सखायः, अहम् एतस्मिन् विषये ‘मनकीबात’ -कार्यक्रमे एतदर्थम् अपि चर्चां कुर्वन् अस्मि येन भारतीयसाङ्केतिक-भाषाम् अवलम्ब्य जागरूकता वर्धेत । एतेन वयं, स्व-दिव्यांग-मित्राणाम् आधिक्येन सहायतां कर्तुं शक्ष्यामः।

भ्रातरः भगिन्यः च! कतिपय-दिनेभ्यः पूर्वं ब्रेल-लिप्यां लिखितं हेमकोशस्य प्रतिम् अहं प्राप्तवान् । हेमकोशः असमिया-भाषायाः सर्वतः प्राचीनेषु शब्दकोशेषु अन्यतमः अस्ति । एषः नवदशे शताब्दे सज्जीकृतः आसीत् । अस्य च सम्पादनं प्रख्यातेन भाषाविदा हेमचन्द्र-बरुआ-वर्येण कृतम् । हेमकोशस्य ब्रेल-संस्करणं प्रायः दशसहस्र-पृष्ठात्मकम् अस्ति, अथ च एतत् पञ्चदशसु, ततोऽप्यधिकेषु वा खण्डेषु प्रकाश्यमानम् वर्तते। एतस्मिन् लक्षाधिकानां शब्दानाम् अनुवादः करणीयः अस्ति । एनं संवेदनशील-प्रयासम् अहम् अत्यन्तं प्रशंसामि । एवंप्रकारकाः प्रत्येकं प्रयासाः दिव्यांग-सखीनां कौशलसामर्थ्ययोः वर्धने अत्यन्तं सहयोगिनः भवन्ति । अद्य भारतं Para-इति दिव्याङ्गक्रीडासु अपि सफलतायाः ध्वजान् उत्तोलयति । वयं सर्वे अनेकासु स्पर्धासु एतस्य साक्षिणः स्मः । अद्य अनेके जनाः एतादृशाः सन्ति, ये दिव्यांगेषु Fitness Culture इत्युक्ते स्वास्थ्यसंस्कारस्य आधारं यावत् प्रसारणे रताः सन्ति । एतेन दिव्यांगानाम् आत्मविश्वासः दृढतरः भवति ।

मम प्रियाः देशवासिनः, अहं कतिपय-दिनेभ्यः पूर्वं सूरतवास्तव्यया पुत्र्या अन्वी-इत्यनया अमिलम् । अन्व्याः, अथ च अन्व्याः

योगाभ्यासेन सह मम मेलनम् अत्यन्तं संस्मरणयुतम् अवर्तत, तद्विषये, अहं 'मनकीबात' -इत्यस्य सर्व-श्रोतॄन् अवश्यं कथयितुम् इच्छामि ।

सखायः, अन्वी, जन्मना एव Down Syndrome इत्यनेन रोगेण पीडिता अस्ति, अथ सा बाल्यात् एव हृदयसम्बद्धेन गभीररोगेण युद्धरता अस्ति । यदा सा केवलं त्रिमासीया आसीत्, तदा एव सा Open Heart Surgery इति हृदयशल्यं सम्मुखीकृतवती । सतीषु एताषु सर्वसमस्यासु, न तु अन्वी, न च तदीयाभिभावकौ पराजयम् अङ्गीकृतवन्तौ । अन्व्याः पितृभ्यां Down Syndrome-इत्यस्य रोगस्य विषये पूर्णसूचनाः एकत्रीकृताः, अथ च निर्णीतं यत् अन्येषु अन्व्याः निर्भरतां कथं न्यूनां करवाव । ताभ्यां अन्व्याः लघुलघुविषयकं प्रशिक्षणम् आरब्धं यत् कथं जलस्य चषकः उत्थापनीयः, पादत्राणस्य सूत्रे कथं समीकरणीये, वस्त्राणां कुड्मलाः (BUTTONS) कथं पिहितव्याः इति । कस्य वस्तुनः किं स्थानम्, के उत्तमाः आचाराः, एतत् सर्वम् अत्यन्तं धैर्येण अन्वीं शिक्षितुं ताभ्यां यतितम् । पुत्र्या अन्व्या येन प्रकारेण शिक्षणेच्छाशक्तिः प्रदर्शिता, स्वप्रतिभा प्रदर्शिता, तया, तस्याः पितरौ अपि प्रोत्साहनं प्राप्तवन्तौ । ताभ्यां योगशिक्षणाय अन्वी प्रेरिता । समस्या एतावती गभीरा आसीत्, यत् अन्वी स्वपादयोः स्थातुम् अपि असमर्था आसीत्, एतस्यां परिस्थितौ तस्याः पितृभ्यां योगशिक्षणाय अन्वी प्रेरिता । प्रथमवारं यदा सा योगप्रशिक्षिकायाः समीपं प्राप्ता, तदा सापि द्वन्द्व-ग्रस्ता आसीत् यत् किम् एषा सरला बाला योगाभ्यासं कर्तुं प्रभविष्यति! परं प्रशिक्षिका अपि कदाचिद् अनभिज्ञा आसीत् यत् अन्वी कस्य मृत्तत्वस्य निर्मितिः अस्ति । सा स्वीय-मात्रा सह योगाभ्यासम् आरब्धवती, अथ अधुना तु सा योगासनेषु निपुणा जाता । अन्वी अद्य समग्र- देशस्य स्पर्धासु सहभागितां करोति, विजयपदकानि च समर्जयति । योगेन अन्व्याः

कृते नूतनं जीवनं दत्तम् । अन्वी तु योगम् आत्मसात्कृत्वा जीवनम् एव आत्मसात्कृतवती ।

अन्व्याः पितरौ मां अवदतां यत् योगेन अन्व्याः जीवने अद्भुताः परिष्काराः जाताः, साम्प्रतं तस्याः आत्मविश्वासः आश्चर्यास्पदः जातः। योगेन अन्व्याः शारीरिकस्वास्थ्यम् अपि उत्कृष्टतरं संजातम्। औषधानाम् आवश्यकता चापि न्यूनतरा जायते। अहमिच्छामि यत् देश-विदेशानां 'मनकीबात'-श्रोतारः अन्व्याः कृते योगस्य लाभानां वैज्ञानिकम् अध्ययनं कुर्वन्तु। अन्वी एकं समीचीनं व्यष्टि-अध्ययनम् अस्ति इत्यहं मन्ये। येऽपि वैज्ञानिकाः योगस्य शक्तिं परीक्षितुम् इच्छन्ति तैः अग्रेसृत्य अन्व्याः साफल्यं अध्येतव्यम्, अखिलं च जगत् योगशक्त्या अभिज्ञातव्यम्। एतादृशं किमपि अनुसन्धानं विश्वे 'डाउन-सिण्ड्रोम'- इत्यनेन पीडितानां बालानां कृते प्रभूतं साहाय्यं कर्तुं शक्नोति। अखिलजगता स्वीकृतमस्ति यत् योगाचरणं शारीरिक-मानसिक-कल्याणार्थम् अतीव प्रभावि वर्तते। विशेषतः मधुमेह-रक्तचाप-सम्बद्धासु समस्यासु योगाचरणं बहुसहायकं भवति। योगस्य एतादृशीं शक्तिं स्वीकृत्य संयुक्तराष्ट्रसङ्घेन प्रतिवर्षं जून-मासीयः एकविन्शतितमः दिनाङ्कः आन्ताराष्ट्रिय-योगदिवसत्वेन आचरितुं  निर्णीतम् । साम्प्रतं संयुक्तराष्ट्रसंघेन भारतस्य अन्यमेकं अभियानं अनुमोदितम्। "भारतीय-उच्चरक्तचाप-नियन्त्रणकल्पः" इत्याख्यः प्रयासः द्विसहस्रोत्तर-सप्तदशमिते वर्षे आरब्धः। अस्य अन्तर्गतं रक्तचाप-समस्याभिः पीडितानां लक्षशो जनानां चिकित्सा शासकीयसेवाकेन्द्रेषु सम्पाद्यते। एतेन उपक्रमेण यथा आन्ताराष्ट्रियसंघटनानां ध्यानम् आकर्षितं तन्नूनम् अपूर्वम् अस्ति। एषः प्रयासः अस्माकं सर्वेषां कृते उत्साहवर्धकः अस्ति यत् येषामपि चिकित्सा संवृत्ता; तेषु प्रतिशतं पंचाशत्प्रायाणां रक्तचापं नियन्त्रितं जातम्। अहमस्य उपक्रमस्य कृते कार्यं

कुर्वद्भ्यः सर्वेभ्यः जनेभ्यः वर्धापनं व्याहरामि, ये स्वीयेन निरन्तर-परिश्रमेण एतं सफलं कृतवन्तः।

सखायः, मानवजीवनस्य विकासयात्रा सततं जलेन सम्बद्धावर्तत। समुद्रः भवेत् नदी वा तडागः वा। भारतस्य सौभाग्यमस्ति यत् प्रायः सार्धसप्तसहस्र-किलोमीटर-दीर्घया तटरेखया समुद्रेण अस्माकम् अखण्ड-सम्बन्धः अवर्तत। एषा तटरेखा अनेकेभ्यः राज्येभ्यः द्वीपेभ्यश्च संचरति। भारतस्य विविधसमुदायानां वैविध्यपूर्णा संस्कृतिः अत्र स्फीयमाना दृश्यते। सहैव च एतेषां तटीय- क्षेत्राणां पानाशनमपि जनान् प्रभूतम् आकर्षयति। परन्तु एतैः विनोदपूर्णैः वृत्तैः साकं एकः दुःखद- पक्षः अपि अस्ति। अस्माकम् एतानि तटीयक्षेत्राणि पर्यावरणसम्बद्धानां अनेकासां समस्यानां साम्मुख्यं कुर्वन्ति। जलवायुपरिवर्तनं सामुद्रिक-पारिस्थितिकी-व्यवस्थायाः कृते प्रमुखं आह्वानं वर्तते, अपरपक्षे चास्माकं समुद्रतटेषु मालिन्यमपि क्षोभकरं वर्तते। एतेषाम् आह्वानानां सम्मुखीकरणार्थम् अनारतं गम्भीर-प्रयासानुष्ठानम् अस्माकं दायित्वम् अस्ति। अत्राहं देशस्य तटीयक्षेत्रेषु 'स्वच्छसागरः-सुरक्षित-सागरः' इति तटीयस्वच्छतायाः प्रयास-विषये वक्तुम् इच्छामि। जुलाईमासे पंचमदिनांके आरब्धम्, एतदभियानं सेप्टेम्बरस्य सप्तदशमिते दिवसे सम्पादितम्। अयं दिवसः तटीय-स्वच्छता-दिवसः अप्यवर्तत। स्वतन्त्रतायाः अमृतमहोत्सवे आरब्धम् इदमभियानं पंचसप्ततेः दिवसेभ्यः प्राचलत्। एतस्मिन् जनसामान्यस्य सहभागित्वं दर्शनीयम् अभवत्। एतस्मिन् अवधौ आहत्य सार्धद्विमासपर्यन्तं स्वच्छतायाः अनेके कार्यक्रमाः सम्पादिताः। गोवाप्रदेशे सुदीर्घा मानवशृंखला निर्मिता। काकिनाडानगरे गणपतिविसर्जनसमये जनाः कृतकानां दुष्प्रभावविषये बोधिताः। एन्.एस्.एस्.-संस्थायाः प्रायः पंचसहस्रैः युवजनैः त्रिंशत्-टन्मिताधिकं कृतकं संगृहीतम्। ओडिशा- राज्ये त्रिदिवसेषु

विंशतिसहस्राधिकैः विद्यालयीयछात्रैः प्रतिज्ञप्तं यत्ते स्वपरिवारस्य परिवेशस्य च जनान् 'स्वच्छसमुद्रः-सुरक्षितसमुद्रश्च'-इत्यस्य कृते प्रेरयिष्यन्ति। अहमस्मिन् अभियाने भागं गृहीतवद्भ्यः सर्वेभ्यः जनेभ्यः वर्धापनं व्याहरामि।

यदाऽहं निर्वाचित-प्रतिनिधिभिः विशेषतः नगराणां महापौरैः, ग्रामाणां सरपंचैः च साकं संभाषे, तदा तान् अवश्यम् अध्यर्थयामि यत्तैः स्वच्छतासदृशेषु प्रयासेषु स्थानीयसमुदायाः संघटनानि च अवश्यं समावेशनीयानि, कार्यं चैतत् नवाचारपद्धत्या सम्पादनीयम्। बेंगलूरुनगरे दलमेकं "यूथ फॉर परिवर्तन" इत्यस्ति। विगतेभ्यः अष्टवर्षेभ्यः एतद्दलं स्वच्छतादि-सामुदायिककार्येषु संलग्नं वर्तते । एतस्य आदर्शवाक्यं सुस्पष्टम् अस्ति - "परिवादं त्यजतु - प्रयासं करोतु" इति। एतेन दलेन अद्य-पर्यन्तं नगरे सप्तत्यधिक-त्रिशतमितानां स्थानानां सौन्दर्यीकरणं सम्पादितम् । प्रत्येकं स्थाने 'यूथ फॉर परिवर्तन'-अभियानेन एकशततः शताधिक-पंचदशमिताः नागरिकाः संयोजिताः। प्रतिरविवासरम् अयं कार्यक्रमः प्रातः आरभ्य मध्याह्नपर्यन्तं प्रचलति। अस्मिन् कार्ये अवकराः तु अपसार्यन्ते एव; भित्तिषु चित्रणं कृत्वा कलात्मक-रेखाचित्राणाम् आलेखनमपि सम्पाद्यते। केषुचित्स्थानेषु प्रसिद्धजनानां आरेखाः उत्प्रेरकसन्देशाः चापि द्रष्टुं शक्यन्ते। बैगलूरुनगर- स्य 'यूथ-फॉर-परिवर्तन'-प्रयासानन्तरम् अहं मेरठनगरस्य 'कबाड़-से-जुगाड़'- इत्यभियान- विषयेऽपि विज्ञापयितुम् इच्छामि। एतत् अभियानं पर्यावरणसंरक्षणेन सहैव नगरस्य सौन्दर्यीकरणे- नापि सम्बद्धम् अस्ति। अस्य अभियानस्य वैशिष्ट्यम् अस्ति यत् अस्मिन् लौहस्य अवशेषः, कृतकानां अपशिष्टः, व्यर्थ-वाहनचक्राणि, भाण्डारपात्राणि इत्यादीनि अपशिष्टवस्तूनि उपयुज्यन्ते। अल्पव्ययेन सार्वजनिकस्थानानां सौन्दर्यीकरणं कथं सम्पादनीयं

इत्यनेन अभियानेन द्रष्टुं शक्यते। अनेन अभियानेन सम्बद्धानां सर्वेषां जनानाम् अहं हार्दिकम् अभिनन्दनं करोमि।

मम प्रियाः देशवासिनः, अस्मिन् समये देशे सर्वत्र उत्सवभावः दृश्यते। श्वः नवरात्रस्य प्रथमः दिवसः अस्ति। अस्मिन्वयं देव्याः प्रथमरूपस्य 'मातुः शैलपुत्र्याः' पूजनं करिष्यामः। इतः परं नवदिवसीयाः नियम-संयमोपवासाः, ततश्च विजयदशम्याः उत्सवः अपि भविष्यति। एकदृशा विचारेण पश्यामः यदस्माकं पर्वसु आस्थाध्यात्म-सहितः कियान् गहन-सन्देशः समाहितः इति। अनुशासनेन संयमेन च सिद्धिप्राप्तिः, तदनन्तरं च विजयपर्व; एषः एव जीवने कस्यापि लक्ष्यसाधनस्य मार्गः भवति। दशहरापर्वानन्तरं 'धनतेरस्', अपि च, दीपावली-उत्सवः अपि आगमिष्यति।

सखायः, विगतवर्षेभ्यः अस्माकं उत्सवैः सह देशस्य नूतनः संकल्पः अपि सम्बद्धः अस्ति। भवन्तः सर्वे जानन्ति, एषः संकल्पः Vocal for Local- इत्यस्य वर्तते। साम्प्रतं वयम् आत्मनः पर्वाणां उत्साहे स्थानीयकर्मकरान्, शिल्पिनः, व्यापारिणः चापि समावेष्टुं शक्नुमः। ऑक्टोबर-मासस्य द्वितीये दिने महात्मगान्धिनः जयन्त्यवसरे अस्माभिः एतदभियानं तीव्रतरं कर्तुं प्रतिज्ञा करणीया। खादी-हस्तवेम-हस्तशिल्पोत्पादैः सहैव स्थानीयोत्पादानां क्रयः अवश्यं करणीयः। अस्य उत्सवस्य यथार्थानन्दः तदैवास्ति यदा सर्वे जनाः अस्य उत्सवस्य सहभागिनः भवन्ति, अतः स्थानीयोत्पादनेन सम्बद्धाः जनाः अपि अस्माभिः अत्र समावेशनीयाः। अस्य उत्तमः उपायः अस्ति यद्वयं उत्सवेषु यत्किमपि उपहारत्वेन यच्छामः तस्मिन् स्थानीयोत्पादः समावेशितः स्यात् । अस्मिन् समये अभियानमिदम् एतत्कृतेऽपि विशिष्टं यतोहि वयं स्वातन्त्र्यस्य अमृतमहोत्सवे आत्मनिर्भरभारतस्य लक्ष्यम् अपि साधयामः, यद्धि स्वतन्त्रतायाः सैनिकानां

कृते यथार्थः श्रद्धांजलिः भविष्यति। अतएव अहं भवद्भ्यः निवेदयामि यदस्मिन् समये खादी-हस्तवेम-हस्तशिल्पोत्पादानां क्रयस्य नूतनं कीर्तिमानं स्थापयन्तु। अस्माभिः दृश्यते यदुत्सवेषु वस्तूनां संस्थापने, स्यूतबन्धने च कृतकानां बहुधा उपयोगः भवति। स्वच्छतापर्वसु कृतकस्यूतानां हानिकारकः अपव्ययः अस्माकम् उत्सवानां भावनायाः विरोधी अस्ति। अतः अस्माभिः केवलं स्थानीयस्तरे निर्मितानाम् अकृतक-पुटकानाम् उपयोगः करणीयः। अस्माकं परिवेशे जूटेति पट्टशणस्य, कार्पासस्य, कदली-फलानां बहूनां पारम्परिकपुटकानां प्रयोगः पुनः वर्धमानः अस्ति। अस्माकं दायित्वम् अस्ति यत् उत्सवानाम् अवसरे एतेषां वर्धनं करणीयं, स्वच्छतया च साकं आत्मनः पर्यावरणीय-स्वास्थ्यस्य चापि पालनं व्यवहरणीयम्।

मम प्रियाः देशवासिनः, अस्माकं शास्त्रेषु उक्तमस्ति - “परहित सरिस धर्म नहीं भाई” इति। अर्थात् परसेवापरोपकारसदृशः धर्मः अन्यः न विद्यते। विगतेषु दिवसेषु देशे समाजसेवायाः एतादृशायाः एव भावनायाः अन्यः एकः दृष्टान्तः परिलक्षितः। भवद्भिः अपि दृष्टं भवेद्यत् जनाः अग्रेसृत्वा कञ्चित् क्षयरोगिणं स्वीकुर्वन्ति, तस्य पौष्टिकाहारस्य दायित्वं गृह्णन्ति। वस्तुतः एषः क्षयरोगमुक्त-भारताभियानस्य अंगः अस्ति; जनसहयोगः कर्तव्यबोधश्च अस्य आधारः वर्तते। सम्यक्पोषणेन, यथासमयं योग्यौषधसेवनेन च क्षयरोगस्य चिकित्सा संभाव्या अस्ति। मम विश्वासः अस्ति यत् जनसहयोगस्य अनया शक्त्या भारतं पंचविंशत्युत्तर-द्विसहस्र-वर्षपर्यन्तं निश्चितरूपेण क्षयरोगमुक्तं भविष्यति।

सखायः, संघशासितेभ्यः दादरा-नगर-हवेली-दमन-दीव-प्रदेशेभ्यः अपि मया एतादृशम् उदाहरणम् अवाप्तं यत् हृदयग्राह्यम् अस्ति। अत्र आदिवासिक्षेत्रवासिन्या जिनु-रावतीया-इत्यनया लिखितमस्ति यदत्र

प्रवर्तमाने ग्राम-दत्तक-कार्यक्रमे चिकित्सामहाविद्यालयस्य छात्रैः पंचाशन्मिताः ग्रामाः स्वीकृताः सन्ति। एतेषु जिनुमहाभागायाः ग्रामः अपि अन्यतमः वर्तते। एते चिकित्साछात्राः रोगपरिहारार्थं ग्रामीणान् जागरूकान् कुर्वन्ति, रोगे सति साहाय्यम् अपि कुर्वन्ति, सर्वकारस्य योजनानां विषये अपि सूचनां ददति। एतया परोपकारभावनया ग्रामजनानां जीवने नूतनसुखं समायातम् । एतस्य कृते अहं चिकित्सा-महाविद्यालयस्य सर्वेभ्यः छात्रेभ्यः वर्धापनं व्यापरामि।

सखायः, 'मनकीबात'-सन्दर्भे निरन्तरं नूतनविषयेषु चर्चाः भवन्ति। अनेकवारम् अस्य कार्यक्रमस्य माध्यमेन वयं केषांचन पुरातन-विषयाणां पुनरीक्षणस्य गभीरावसरम् अपि प्राप्नुमः। विगतमासे 'मनकीबात'-इत्यस्मिन् अहं स्थूलान्नविषये, अपिच, त्रयोविंशत्युत्तर-द्विसहस्रतम-वर्षम् 'आन्ताराष्ट्रिय-यव-वर्षत्वेन मानितुं चर्चां कृतवान् । विषयेऽस्मिन् जनाः अतीव उत्सुकाः सन्ति। एतादृशानि बहूनि पत्राणि मया प्राप्तानि येषु जनाः सूचयन्ति यत्कथं तैः कोदो-अन्नं स्वीय-दैनन्दिनभोजनस्य अंशत्वेन स्थापितम्। अनेकैः जनैः कोदो-निर्मितानां पारम्परिकव्यंजनानां विषये अपि सूचितमस्ति। एते महत्परिवर्तनस्य संकेताः सन्ति। जनानाम् उत्साहमेनं दृष्ट्वा अहं मन्ये यद्वयं मिलित्वा एकम् ई-पुस्तकं सज्जीकरवाम, यस्मिन् जनाः यवनिर्मितानि व्यंजनानि, स्वीयानुभवान् च संविभाजयितुं शक्नुयुः । एतेन आन्ताराष्ट्रिय-यव-वर्षस्य आरम्भात् पूर्वमेव अस्मत्सकाशं कोदोविषयकः विश्वकोशः सन्नद्धः भविष्यति। तदा चैषः MyGov-portal-उपरि प्रकाशयितुं शक्यते।

सखायः, मनोगतम् इत्यस्मिन् एतद्वारम् एतावदेव। परं प्रतिष्ठन् अहं भवद्भ्यः राष्ट्रियक्रीडानां विषयेऽपि वक्तुं इच्छामि। गुजराते सेप्टेम्बरमासे ऊनत्रिंशत्तमे दिवसे राष्ट्रीय-खेलानां आरम्भः भविष्यति । एषः

अतीव विशेषावसरः यतोहि राष्ट्रियक्रीडानाम् आयोजनं बहुवर्षेभ्यः परं क्रियते। कोविड्महारोग-कारणात् प्राक्तनानि आयोजनानि निरस्तीकृतानि आसन्। अस्याः क्रीडास्पर्धायाः सहभागिभ्यः प्रत्येकं क्रीडकाय मम शुभकामनाः। एतेषु दिवसेषु क्रीडकानाम् उत्साहवर्धनार्थम् अहं तेषां मध्ये एव स्थास्यामि। भवन्तः सर्वेऽपि राष्ट्रियक्रीडानाम् अन्वीक्षणेन स्वीयक्रीडकान् प्रोत्साहयन्तु । साम्प्रतमहं प्रस्थानं करोमि। आगामिनि मासे 'मनकीबात'-प्रसारणे पुनः नूतनविषयैः सह पुनः मेलिष्यामः। धन्यवादः। नमस्कारः।

*******

[भाषान्तरं - सर्वश्री-श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com